# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

| | | |
|---|---|---|
| कक्षा - शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् -** ५ | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड -** C.C-2.3.5 | समयः - ३:०० तः ६:०० |
| दिनाङ्कः - २९.११.२०१६ | सन्दर्भग्रन्थः - परिभाषेन्दुशेखरः, व्याकरणमहाभाष्यम् | |

---

प्रथमान्वितिः (युनिट - १)

प्रश्नः १ त्रिषु कौ अपि द्वौ उत्तरयत (८)

(अ) परिभाषेन्दुशेखरस्यमङ्गलाचरणां विलिख्य व्याख्यात।

(आ) नानुबन्धकृतमसारूप्यम् इत्येतां परिभाषां व्याख्यात।

(इ) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः इति परिभाषां व्याख्यात।

प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत (८)

(क) यथोद्देश-कार्यकालपक्षौ विवेचयत।

(ई) यदागमपरिभाषां विवेचयत।

प्रश्नः ३ चतुर्षु कयोः अपि द्वयोः विषये टिप्पणी लेख्या (४)

(क) कार्यकालपक्षः

(ख) व्याख्यानतो विशेषप्रतिपत्तिः

(ग) एकान्ता अनुबन्धाः

(घ) यत्रानेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयः

प्रश्नः ४ सप्तसु केषाञ्चित् पञ्चानाम् एकवाक्येन उत्तराणि लेख्यानि (५)

(क) धात्वधिकारे असरूपः अपवादप्रत्ययः विकल्पेन कस्य बाधकः भवति?

(ख) इण्-प्रत्याहारे कस्य णकारस्य ग्रहणं कर्तव्यम्?

(ग) अनिनस्मन्ग्रहणान्यर्थवता... इत्यादि-परिभाषा कथं सिद्धा?

(घ) उभयगतिः कस्मिन् विषये भवति?

(ङ) स्थण्डिलाच्छयितरि.. इत्यादि सूत्रं कस्याः परिभाषायाः ज्ञापकम्?

(च) प्रणिदापयति इत्यत्र दापेः घुसंज्ञा कस्मात् न भवति?

(छ) प्रोढवान् इत्यत्र वृद्धिः कस्मात् न भवति?

द्वितीयान्वितिः (युनिट - २)

प्रश्नः ५ त्रिषु कौ अपि द्वौ उत्तरयत (८)

(अ) व्यपदेशिवदेकस्मिन् इति परिभाषा व्याख्येया।

(आ) वर्णाश्रये नास्ति प्रत्ययलक्षणम् इत्येषा परिभाषा ग्रन्थोक्तदिशा व्याख्येया।

(इ) प्रत्ययग्रहणे चापञ्चम्याः इत्येषा परिभाषा ग्रन्थोक्तदिशा व्याख्येया।

प्रश्नः ६ द्वयोः किमपि एकम् उत्तरयत (८)

(क) कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् इत्येषा परिभाषा सोदाहरणं सविस्तरं च व्याख्येय

(ख) एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः इति परिभाषा व्याख्येया

प्रश्नः ७ चतुर्षु कयोः अपि द्वयोः विषये टिप्पणी लेख्या (४)

(ङ) तदन्तविधिः

(च) प्रत्ययग्रहणे तदन्दग्रहणम्

(छ) अव्युत्पन्नानि प्रातिपदिकानि

(ज) भाव्यमानाः वर्णाः

प्रश्नः ८ सप्तसु केषाञ्चित् पञ्चानाम् एकवाक्येन उत्तराणि लेख्यानि (५)

(क) गर्गादिभ्यो विहितः यञ् परमगर्गादिभ्योऽपि भवति न वा?

(ख) अस्य अपत्यम् इः इत्येवं रूपं सिध्यति न वा?

(ग) रदाभ्यां निष्ठातो नः.. इत्यादिसूत्रे का परिभाषा अनुसरणीया?

(घ) अतिकारीषगन्ध्यापुत्रः इत्यत्र ष्यङः सम्प्रसारणम् इत्यादि कुतो न भवति?

(ङ) त्यदादीनामः इत्यनेन अनुनासिकस्य अकारस्य विधानं कुतो न भवति?

(च) दिव उत् इति सूत्रं कस्याः परिभाषायाः ज्ञापकम्?

(छ) देवदत्तश्चिकीर्षति इत्यत्र देवदत्ते सन्नन्तत्वप्रयुक्तधातुत्वापत्तिः कुतो न भवति?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ९ त्रिषु कौ अपि द्वौ उत्तरयत (८)

(अ) 'अथ शब्दानुशासनम्' इति भाष्यपङ्क्तिं व्याख्यात।

(आ) 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते' पङ्क्तिमिमां व्याख्यात।

(इ) 'ऊहः खल्वपि' पङ्क्तिमिमां भाष्यदिशा व्याख्यात।

प्रश्नः १० द्वयोः किमपि एकम् उत्तरयत (८)

(क) कः शब्दः? भाष्यदिशा स्पष्टयत।

(ख) व्याकरणाध्ययनस्य मुख्यप्रयोजनानि विवृणुत

प्रश्नः ११ द्वयोः कस्यापि एकस्य विषये टाम्प्पणी लेख्या (२)

(क) चत्वारि शृङ्गा त्रयोऽस्य पादाः

(ख) दशम्यां पुत्रस्य

प्रश्नः १२ चतुर्षु कयोश्चित् द्वयोः एकवाक्येन उत्तराणि लेख्यानि (२)

(क) यस्तु प्रयुङ्क्ते... इत्यादि-श्लोकः कुत्र पठितः?

(ख) कः अपशब्दैः दुष्यति?

(ग) प्रत्यभिवादे नाम्नः प्लुतिं के न विदुः?

(घ) कीदृशः मनुष्यः सम्यक् वेदान् परिपालयिष्यति?

***